शीयपौर्णमास्यां स्त्री ङीप् । भद्रेव स्वार्थे अण् । ३पूर्वोत्तरभाद्रपदाख्यनक्षत्रे न० । "भाद्रद्वये सागरे" ज्योतिषम् । ४भाद्र्या पौर्णमास्यायुक्ते पक्षे तथाविधे ५गुरुवर्षे च कार्त्तिकशब्दे दृश्यम् ।

**भाद्रपदा** स्त्री ब०व० । भद्रस्येदं अण् भाद्रमिव पदमासाम् । अश्विन्यवधिके पञ्चविंशषड्विंशयोर्नक्षत्रयोः । १तद्युक्ता पौर्णमासी अण् ङीप् । २भाद्रमासस्य पौर्णमास्याम् साऽस्य मासे अण् । ३चान्द्रे भाद्रे मासि पु० । माहशे ४पक्षे ५गुरुवर्षभेदे च कार्त्तिकशब्दे दृश्यम् ।

**भाद्रमातुर** पु० भद्रायाः सत्याः मातुः अपत्यम् अण् मातुरुत् । सतीपुत्रे हेमच० ।

**भान** न०भा–भावे ल्युट् । १प्रकाशे २दीप्तौ ३ज्ञाने प्रकाशे च ।

**भानु** पु० भा–नु । १सूर्य्ये २अर्कवृक्षे ३किरणे ४राजनि च अमरः ५प्रभौ धरणिः । ६भूतजैनभेदे हेमच० । उत्तममन्वन्तरे ७देवे ब०व० हरिवं०६अ० । ८धर्मपत्नीभेदे स्त्री हरिवं० ३अ० । १०गन्धर्वभेदे पु० भा०आ०६५अ० । ११यदुवंश्यक्षत्रियभेदे भानुमत्याः पितरि पु० हरिवं० १४८अ० । १२विष्णौ पु० "अन्नतांमृङ्गवो भानुः"विष्णुस० "तमेव भान्तमनुभाति सर्वम्" श्रुतेस्तस्य तथात्वम् ।

**भानुफला** स्त्री भानुरिव दीप्तिमत् फलं प्रसवो यस्याः । कदल्याम् जटाधरः । तस्याः मोचकस्य सूर्य्यतुल्यवर्णत्वात्तथात्वम् । [१४८ अ० ।

**भानुमती** स्त्री भानोर्यादवनृपभेदस्य कन्यायां हरिवं०

**भानुमत्** स्त्री भानुः किरणोऽस्त्यस्य मतुप् । १सूर्य्ये शब्दरत्ना० २अर्कवृक्षे च । भानुमालीत्यप्यत्र । ३नृपभेदे पु० भा०भी० ५४अ० । अहंजातिनृपस्य भार्य्यायां जाते कृतवीर्य्यस्य ४दुहितृभेदे स्त्री भा० आ० ९५अ० ।

**भानुसेन** पु० कर्णपुत्रभेदे भा० क० ४८ अ० ।

**भानेमि** पु० भानोः नेमिरिव ।१सूर्य्ये २अर्कवृक्षे च त्रिका० ।

**भान्त** पु० भायाः दीप्तेः पञ्चदशाहमध्ये अन्तो यस्य । शुक्लकृष्णपक्षयोः पञ्चदशाहमध्ये कान्तिरुपचयापचययुक्ते चन्द्रे "भान्तः पञ्चदशी" यजु० १४।२३ वेददी० ६त० । २नक्षत्रराश्योरन्ते च ।

**भाम** क्रोधे भ्वा०आत्म०अक०सेट् । भामते अभामिष्ट बभामे ।

**भाम** पु०भाम–घञ् ।१क्रोधे निघण्टुः ।भा–भावे म ।२दीप्तौ च । कर्त्तरि म । ३सूर्य्ये मेदि० । ४अर्कवृक्षे च । ५भगिनीपतौ पु०शब्दरत्ना ६कोपनायां स्त्रियां स्त्री मेदि० ।

**भामनी** पु० भामं नयति नी–क्विप् । परमेश्वरे "एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद" छा०उ० । "एष उ भामनीरेष हि यस्मात् सर्वेषु लोकेष्वादित्यचन्द्राग्न्यादिरूपैर्भाति दीप्यते । "तस्य भासा सर्वमिदं विभातीति" श्रुतेरतो भामानि नयतीति भामनीः"भा० । [नायां स्त्रियाम् स्त्री ङीप् अमरः ।

**भामिन्** त्रि०भाम–णिनि । क्रोधयुक्ते स्त्रियां ङीप् । कोप०

**भार** पु० भृ–घञ् ।१गुरुत्वपरिमाणे २तद्वति द्रव्ये ३विंशतितुलापरिमाणे (अष्टसहस्रतोलकपरिमाणे) च पु०।३वीवधे ४विष्णौ च मेदि० ।

**भारङ्गी** स्त्री भृ–बा० अङ्गच् । पोषणकर्त्र्यां स्त्रियां ततः काश्या० ठञ् । भाराङ्गिक तत्र भवे त्रि० ।

**भारण्ड** पु० उत्तरदेशजे खगभेदे "एकोदराः पृथग्ग्रीवा अन्योऽन्यफलभक्षिणः । असंहता विनश्यन्ति भारण्डा इव पक्षिणः" पञ्चत० ।

**भारत** न० भरतान् भरतवंश्यानधिकृत्य कृतो ग्रन्थः अण् । भारं वेदादिशास्त्रेभ्योऽपि सारांशं तनोति तन–ड वा । १वेदव्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे । भरतेन त्रिक्षितं तस्येदं वा अण् । "हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता । तस्मात्तु भारतं वर्षम्" इत्युक्ते जम्बुद्वीपान्तर्गते २वर्षभेदे । भरतस्य गोत्रापत्यम् अण् । भरतनृपस्य ३वंश्ये । भरतेन मुनिना प्रोक्तमण् ।४भरतमुनिकृते नाटकशास्त्रादौ न० । तदधीयते पुनरण् ।५नटे ब०व०६अग्निभेदे च ग्रन्थरूपभारतशब्दस्य निरुक्तिः भा०आ०१अ०दर्शिता यथा "एकतश्चतुरो वेदान् भारतञ्चैतदेकतः । पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम् । चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा । तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते । महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम् । महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते" ।

तच्च वेदव्यासेन कृतं तदादिष्टः तच्छिष्यः वैशम्पायनः जनमेजयं श्रावयामास यथोक्तं भा० आ० १अ० ।

"जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः । शशास शिष्यमासीनं वैशम्पायनमन्तिके । स सदस्यैः सहासीनः श्रावयामास भारतम् । कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनःपुनः । विस्तरं कुरुवंशस्य गान्धार्य्या धर्मशीलताम् । क्षत्तुः प्रज्ञां,धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत् । वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम् । दुर्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः" ।